International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 247-251
© 2023 IJSR
www.anantaajournal.com
Received: 05-01-2023
Accepted: 06-02-2023

**खेमलाल शर्मा**
सहायकप्राद्यापक, सरकारी संस्कृत महाविद्यालय, साम्दोङ, नई दिल्ली, भारत

**Corresponding Author:**
**खेमलाल शर्मा**
सहायकप्राद्यापक, सरकारी संस्कृत महाविद्यालय, साम्दोङ, नई दिल्ली, भारत

# संस्कृतव्याकरणपरम्परा

**खेमलाल शर्मा**

**सारांश**
संस्कृतभाषायाः व्याकरणेषु मुख्यं पाणिनीयव्याकरणं विद्यते। पाणिन्युत्तरत्तरकालिकाः वैयाकरणाः तं पाणिनीयव्याकरणपद्धतिम् अनुकुर्वन्ति। अतः संस्कृतव्याकरणेषु मेरूदण्डवद्विराजते पाणिनिः। तं महामुनिमाधारीकृत्य संस्कृतवैयाकरणानां विभागाः कर्तुंशक्यन्ते, व्याकरणशास्त्रस्य पाणिनिपूर्वकालिकालिकाः वैयाकरणपरम्परा, पाणिनीयव्याकरणपरम्परा, पाणिन्युत्तरकालिकाः पाणिनीय-वैयाकरणपरम्परास्चेति त्रिधाविभक्तुं शक्यन्ते। पाणिनिः पूर्वाचार्याणाम् आशयमङ्गीकृत्य नूतन वैयाकरणपद्धतिं प्रणीतवान्, ततः व्याकरणस्य यावत्यः शाखाः पल्लविताः, तासां सर्वासां मूलम्पाणिनीयव्याकरणमेव विद्यते। अतः व्याकरणशास्त्रस्य ऐतिहासिके अध्ययने पाणिनिः केन्द्रबिन्दुरूपेण संस्कृतवैयाकरण-परम्परायाः विभागःक्रियते।

**कूटशब्दः** तृषि, पाणिनीय, सुकरः, इत्यादयाः

**प्रस्तावना**
व्याकरणमित्यनेन असाधुशब्दावधिक-साधुशब्दकर्मक-पृथक्कृतप्रयोजकनियम-विशेष इति। इदं व्याकरणशास्त्रं शब्दानामनुशासनपूर्वकम् अस्माद् शब्दादयमर्थः, अस्यार्थस्य अयं शब्द इति शब्दार्थयोः तादात्म्यसम्बन्धइति। यथा- मञ्जूषायां *'इतरेतराध्यासमूलकं तादात्म्यम्'*इति। इदं शास्त्राध्ययनाद् लोके सुखमावहति तदनन्तरं परमार्थञ्च कारयतीति। यथा – *'एकः शब्दः सम्यग्ज्ञातः सुष्टुः प्रयुक्तः स्वर्गे लोके च कामधुग् भवति'*। मोक्षोऽपि व्याकरणाध्ययने भवतीति प्रमाणं वर्तते। शिष्टशाधुशब्दज्ञानपुरःसरं प्रयोगे धर्मो भवति। *'आत्मनः प्रतिकूलानि परेषां न समाचरेत्'* इति वेदवचनमपि तदेव लक्ष्यं करोति। अस्मिन् व्याकरणशास्त्रे नैके आचार्याः बभूवुःतेषु प्रमुखाः सन्ति- पाणिनिः, कात्यायनः, पतञ्जलिः । तत्पूर्वकालिकानामुत्तरकालिकीनाञ्च वर्णनमस्ति अत्र ।

**संस्कृतव्याकरणपरम्परा:**
पाणिनेःपूर्वं वेदसम्बन्धिप्रातिशाख्यादिव्याकरणप्रतिपादकग्रन्थाः आसन्, केचन सन्ति च। पाणिनेः प्राक्बहवः आचार्याः आसन्। इन्द्र- वायु- भरद्वाज - भागुरि- पौष्करसाद्याचार्याः। एते आचार्याः पाणिनेः पूर्विकाः, किन्तु तेषां नामानि अष्टाध्याय्यां नलक्ष्यन्ते। किन्तु दशपूर्विकाचार्याणां नामानि पाणिनिना स्वव्याकरणसूत्रेषु प्रतिपादितानि। ते आपिशलिः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः, सेनकः, स्फोटायनश्च [1]।
आपिशलिः आपिशलेः नाम'वासुप्यापिशले [2]:' इति अष्टाध्यायीसूत्रे उल्लेखितम्। एवं महाभाष्य-महाभाष्यप्रदीप- काशिका–न्यासादिषु ग्रन्थेषु तस्य स्थानं दृश्यते। पतञ्जले: काले आपिशल व्याकरणस्य महान्प्रचार: आसीदिति भाष्येण ज्ञातुंशक्यते।

**काश्यपः**
काश्यपः व्याकरणस्य नाम सूत्रद्वयेन पाणिनिना प्रतिपादितमभवत्। तत् *'तृषि- मृषिकृषेःकाश्यपस्य* [3] *" 'नोदात्तस्वरितोदयमागार्ग्यकाश्यपगालवानाम्* [4]*'* इति। *"लोपकाश्यप-शाकटायनौ* [5]*'* इति वाजसनेयीप्रातिशाख्ये

[1]. जि गंगाधरननायर, व्याकरचरितम् पृ. 4
[2]. पाणिनि अष्टाध्यायी ६. १. ९२ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[3]. पाणिनि अष्टाध्यायी १. २. २५ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[4]. पाणिनि अष्टाध्यायी ८. ४ .६७ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[5]. वाजसनेयप्रातिशाख्य ४.५

काश्यपशाकटायनयोः नामप्रतिपादनमभवत्। 'काश्यप' शब्दः गोत्रप्रत्ययान्तो भवति, तदनुसारेण मरीचीपुत्रः 'काश्यपः' इति पण्डितानांमतम्[6]। " अद्यकाश्यप व्याकरणस्य किमपिसूत्रं नोपलभ्यते।

**गार्ग्य:**

गार्ग्याचार्यस्य नामप्रतिपादितानि त्रीणि लसूत्राणि पाणिनिना प्रोक्तानि। तानि "*अगार्ग्यगालवयोः*[7] *अतोगार्ग्यस्य*[8]' *'नोदात्त-स्वरितोदय-गार्ग्य-काश्यप- गालवानाम्*[9] " इति। 'गार्ग्य' शब्द अपिगोत्रप्रत्ययान्तः सः भरद्वाजस्य पुत्रः आसीत् इति पण्डितानां मतम्[10]। गार्ग्यमतस्योल्लेखः ऋक् – वाजसनेयादिप्रातिशाख्येषु निरुक्ते अपि द्रष्टुंशक्यते।

**गालव:**

सूत्रचतुष्टयेन गालवाचार्यस्य अभिप्रायः पाणिनिना स्वस्य सूत्राणि तानि' इकोह्रस्वोऽङ्यो गालवस्य [11] अष्टाध्याय्याम् उल्लिखितानि। गालवस्य *'अड्गार्ग्यगालवयोः'* [12] *'तृतीयादिषुभाषितपुस्कपुंवद्गालवस्य* [13] *नोदात्त-स्वरितोदयमगार्ग्यकाश्यप-गालवानाम्*[14] ' इतिप्रमाणत्त्वेन वर्तते।

**चाक्रवर्मा:**

चाक्रवर्मणस्य *'ईचाक्रवर्मणस्य'*[15]इति पाणिनीयसूत्रे पदस्य प्रयोग प्रामाण्यम्।

**भरद्वाज**

*'ऋतोभरद्वाजस्य'*[16] इति इदमपि सूत्रं पाणिनेः भारद्वाजप्रतिपादितमस्ति। स इन्द्रस्य शिष्य: भारद्वाजः आसीदिति पण्डितानांमतम्।

**शाकटायन:**

अष्टाध्याय्यां त्रीणि सूत्राणि शाकटायनोनाम आचार्यस्य प्रतिपादितानि सन्ति। तानि *'लङः शाकटायनस्यैव'*[17] *'व्योर्लघुप्रयत्नतरःशाकटायनस्य'*[18] *'त्रिप्रभृतिषुशाकटायनस्य'*[19] ' इति तस्य

नामवाजसनेयप्रातिशाख्ये निरुक्ते च निर्देशरूपेण द्रष्टुं शक्यते[20] महाभाष्ये व्याकरणे ' *'शकटस्यचस्तोकम्'* इति शाकटायनस्य मतमुद्धृतम्। पाणिनिना शकटशब्दः नडादिगणेपठितः। शाकटायनस्याभिप्राये सर्वनामधातुजमाह इति वैयाकरणाः मन्यन्ते। यास्कपतञ्जलयोः अभिप्रायेण वैदिकलौकिकोभय शब्दयोः अन्वाख्यानमकरोत्।

**शाकल्य:**

चतुर्भिः सूत्रैः पाणिनिना आचार्यशाकल्यस्य नामचतुर्षु स्थानेषु कृतमस्ति। तानि *''सम्बुद्धौशाकलस्येतावनार्षे* [21] *इकोऽसवर्णेशाकल्यस्य ह्रस्वश्च* [22] ' *लोपःशाकल्यस्य*[23] ' *सर्वत्रशाकल्यस्य*[24]' इति। केषाञ्चित् पण्डितानाम् अभिप्राये शाकल्यकृतं व्याकरणशास्त्रं साम्प्रतं नोपलभ्यते इति प्रायशः सर्वे वैयाकरणा अङ्गीकुर्वन्ति। किन्तु तेन कृतात् ऋक्पदपाठात् पाणिन्यादिभिः नियमाः सङ्ग्रहीताः इति।

**सेनक:**

गिरेश्च सेनकस्य ' इतिके वलमेकेन सूत्रेण' सेनक' नाम्नः वैयाकरणस्य उल्लेखः पाणिनिना कृतः। अष्टाध्यायीं विहाय तद् विषये किमपि ज्ञातुं नैव शक्यते।

स्फोटायनाचार्यस्य उल्लेख : पाणिना एकस्मिन् सूत्रे कृतो वर्तते। *'अवङ्स्फोटायनस्य'*। [25] सः स्फोट- प्रतिपादकः वैयाकरणः। तस्य वास्तविकनामज्ञातं वर्तते। हेमचन्द्रस्य अभिधानमणिकोशे *'स्फोटायनेतुकाक्षिवान्'* इति प्रयोगात्तस्य अपरं नाम भवति काक्षिवान् इति ज्ञातुं शक्यते[26]।

स्फोटवादः वैयाकरणानां प्रधानवादानां मध्ये प्रथमो भवति। 'एवं तर्हि स्फोटः शब्दः ध्वनिः शब्दः तद्गुणः [27] " इति भाष्यवचनात् ' स्फोटायन: शाब्दिकेषु प्रसिद्धस्फोटतत्त्ववादि उपज्ञातश्च प्रतिज्ञातुं शक्यते। उपर्युक्तानां दशवैयाकरणानां नामानि पाणिनीय सूत्रेषु द्रष्टुं शक्यन्ते। तानि सूत्राणि अनुसृत्य पाणिनेः पूर्वं तेषां कालः इति निरूपयितुं शक्यते, किन्तु तेषां विशेषज्ञानम् असम्भाव्यम् इति कथ्यते। उपर्युक्तानाम् आचार्याणां मध्ये आपिशलिनाम वैयाकरणः पाणिनेः समकालीनः इति कथ्यते। *'वासुप्यापिशलेः'*[28] तस्मिन् काले विविधस्थानेषु तस्यशाला: प्रचलन्तिस्मः। ताः 'आपिशलिशाला' इति प्रसिद्धाः। आपिशलिव्याकरणाद् बहूनि सूत्राणि अन्य वैयाकरणाचार्यैः तेषां व्याकरणे प्रमाणरूपत्वेन उद्धृयन्ते। आपिशलमधीते इति वाक्यं कात्यायनः वार्तिके उदाहरति। भाष्यकारः धेनूनां समूहः धेनुकम् इति निष्पादयितुम् एकम् आपिशलिसूत्रं सूचयति , तच्च सूत्रं धेनोरनञः इति ज्ञायते भाष्य व्याख्यानेभ्यः[29] पाणिनिस्मृत- आचार्यैः रचिताः सूत्रपाठाः तथानुषङ्गिकग्रन्थाः वा इदानीं प्रायेणन उपलभ्यन्ते। ' कात्यायनेन पतञ्जलिना च पाणिनेः पूर्वाणि व्याकरणानि पूर्वं सूत्रशब्देनव्यवहृतानि इति। आपिशलः सूत्रपाठः प्रणष्टः , कानिचित्सूत्राणि काशिकादिषु उद्धृतानि सन्ति। यथा 'तुरुस्तुशम्यमः सार्वधातुकासुछन्दसि' इति। पाणिनेः प्राचीनं शाकटायन व्याकरणम् अद्यतनकालेनोपलभ्यते।

शाकटायनव्याकरणन्तु अर्वाचीनम्। प्राचीनः वैयाकरण : शाकटायनः एव ' ऋक्तन्त्रम् ' इति प्रसिद्धस्य सामवेदप्रातिशाख्यस्य प्रणेता इति लोकवादः अस्ति [30] आपिशलिव्याकरणे विद्यमानानां केषाञ्चित् सूत्राणां प्रभावः पाणिनीय व्याकरणे द्रष्टुं शक्यते इति युधिष्ठिरमीमांसकः अभिप्रेति। " रामायणस्य उत्तरकाण्डे सोऽयं नवव्याकरणार्थवेत्ता ' इति उपलभ्यते। एवं श्रीतत्त्वविधिनामके वैष्णवग्रन्थेन व्याकरणानां निर्देशः एवंविधः प्राप्यते[31] तद्यथा –

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्[32]।।इति।

संस्कृतभाषायां बहव्यः व्याकरणपरम्पराः सन्ति। अद्य उपलभ्यमानेषु व्याकरणेषु मध्ये पाणिनीयं व्याकरणम् एव प्राचीनकालात् आरभ्य इदानीं यावत् अविच्छिन्नं प्रचलति। अस्याः परम्परायाः प्रणेता पाणिनिः। पाणिनिना स्वकीये व्याकरणे बहूनि पूर्वियाचार्याणां नामानि सूत्रेषु प्रतिपादितानि तेषां मतान्यपि स्वकीय

[6]. स्फोट विमर्शः.पृ. १८
[7]. पाणिनि अष्टाध्यायी ७. ३ .९९ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[8]. पाणिनि अष्टाध्यायी ८. ३. २० चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[9]. पाणिनि अष्टाध्यायी ८. ४. ६७ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[10]. स्फोट विमर्शः पृ. १९
[11] पाणिनि अष्टाध्यायी ६. ३. ६१ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[12]. पाणिनि अष्टाध्यायी ७. ३ .९९ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[13]. पाणिनि अष्टाध्यायी ७. १. ७४ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[14]. पाणिनि अष्टाध्यायी ८. ४. ६७ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[15]. पाणिनि अष्टाध्यायी ६. १. १३० चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[16]. पाणिनि अष्टाध्यायी ७. २. ६३ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[17]. पाणिनि अष्टाध्यायी ३. ४. १११ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[18]. पाणिनि अष्टाध्यायी ८. ३. १८ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[19]. पाणिनि अष्टाध्यायी ८ .४. ५० चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[20]. स्फोट विमर्शः पृ.२०
[21]. पाणिनि अष्टाध्यायी १.१. १६ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[22]. पाणिनि अष्टाध्यायी ६. १. १२७ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[23]. पाणिनि अष्टाध्यायी ८ .३. १९ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[24]. पाणिनि अष्टाध्यायी ८. ४. ५१ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[25]. पाणिनि अष्टाध्यायी ५. ४. ११२ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[26].स्फोट विमर्शः पृ. २३
[27].पतञ्जलि महाभाष्यम् १.१ ७० चौखम्बा सुरभारती वाराणसी . सन् २००४
[28]. पाणिनि. अष्टाध्यायी ६.१. ९२ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
[29]. संस्कृव्याकरँशास्त्रस्येतिहास पृ १२. १३ बहालगढ सोनीपत हरियाणा सन् १९८४
[30]. जि गंगाधरन नायर व्याकरणचरित्रम् पृ. ५
[31].संस्कृव्याकरँशास्त्रस्येतिहास पृ १२. १३ बहालगढ सोनीपत हरियाणा सन् १९८४
[32].संस्कृव्याकरणशास्त्रस्येतिहास पृ १२. १३ बहालगढ सोनीपत हरियाणा सन् १९८४

व्याकरणपरिपोषणार्थं तेन स्वीकृतानि[33]। सः पाणिनिः अस्याः परम्परायाः मुख्याचार्यः वर्तते।

**पाणिनिः**

पणनं पणः। पणः वहारेस्तुतौच इत्यस्मात् *'घञर्थेकविधानम्'*[34] इति कप्रत्ययः सोऽस्यास्तीति पणी *'अतइनिठनौ'*[35] " इतिसूत्रेण इनि प्रत्ययः। तस्य गोत्रापत्यं पाणिनिः। पाणिनः , पाणिनिः , दाक्षीपुत्रः , शालङ्की शालातुरीयः इत्येतानि पाणिनेःनामानि। पाणिनिः वशब्दस्य निष्पत्त्यनुसारेण तस्य पितुर्नाम पणि इति। मातुर्नाम दाक्षी इति पण्डितानाम् अभिप्रायः शालातुरनामग्रामः पाकिस्तानराज्ये लाहोर नगरस्य दक्षिणभागे पञ्चकिलोमीटरदूरे वर्तते ।

**कालः**

पाणिनेः कालविषये स्पष्टतया किमपि नोपलभ्यते। किन्तु तस्य रचनाशैलीप्रतिपादितविषयांश्च आधारीकृत्य विदुषाम् अनुमानेन तस्य कालः क्रिस्तोः पूर्वं चतुर्थे पञ्चमे वा शतके अस्तीति आधुनिकैः ऐतिहासिकैः अङ्गीक्रियते[36]।
पाणिनीयव्याकरणम् अष्टाध्यायीति नाम्ना प्रसिद्धम्। व्याकरणमिदं सहस्रपूर्ववर्ति-व्याकरणानां मध्ये संक्षिप्ततमं विद्यते। वैदिकलौकिकोभयविधाः शब्दाः उपचतुस्सहस्रेषु सूत्रेष्वन्वाख्याताः। अन्वाख्यातार्थमिदं प्रकृतिप्रत्यय – विभागपूर्वकं विन्यस्तम् अत्रत्यानि सूत्राण्यपि लघूनि। सूत्राणां लघूकरणे प्रत्याहारपद्धतेरनुसरणमेव कारणम्। संज्ञापरिभाषा–अधिकारसूत्राणां गणपाठस्यानुबन्धानाञ्च निर्देशोऽपि सूत्राणां लघुकरणे कारणम्। पाणिनिव्याकरणं स्मृतिरूपं विद्यते। पाणिनि स्मृतिरूपनिबद्धेति[37] इति काशिकावचनमेवात्र प्रमाणम्। स्मृतिनियतकालावच्छिन्ना भवति। स्मृतिरूपत्वेन पाणिनीयव्याकरणमिति तदानीन्तनीयाः देववाण्यावर्तते। तत्रापिचेदं व्याकरणमुत्तरोत्तरं संक्षिप्यमाणानां व्याकरणानां संक्षिप्ततमं संस्करणं प्रवचनं वा विद्यते। तदुक्तं पदमञ्जर्या-पाणिनिरपिस्वकाले शब्दान्प्रत्यक्षयन् आपिशलादिनापूर्वस्मिन्नपिकाले सत्तामनुसन्धत्ते [38] इति। कैयटोऽपि पदमञ्जरीवचनमनुसरति। अत एवोक्तं तेन प्रदीपे नियतकालाश्च स्मृतयोव्यवस्थाहेतवः इति मुनित्रयमतेनाद्यत्वेसाध्वसाधुप्रविभागः[39]।

**कृतयः**

पाणिनिनाप्रणीताः ग्रन्थाः भवन्ति [40] अष्टाध्यायी, गणपाठः, जाम्बवतीविजयञ्च।जाम्बवतीविजयम् इति नामध्येयं काव्यं विहाय सर्वे ग्रन्थाः व्याकरणग्रन्थाः भवन्ति। व्याकरणशास्त्रं पञ्चाङ्गानां संयोजनमिति यथा-
पञ्चाङ्गव्याकरणम् यथा-
सूत्रपाठ :,
धातुपाठः,
गणपाठः,
उणादिपाठः,
लिङ्गानुशासनम्
इति पञ्चाङ्गानि। शब्दसाधुत्वबोधनाय व्याकरणसूत्रं प्रमाणम्। अतःपाणिनीयव्याकरणे सूत्रपाठः अष्टसु अध्यायेषु निबद्धः इत्यतः ग्रन्थोऽयम् ' अष्टाध्यायी ' इति अष्टकम् इति च विख्यातोक्तः सः ग्रन्थः पाणिनीयम् इत्यपरनामत्वेन प्रसिद्धो भवति। अयं सूत्रपाठः पाणिनिप्रोक्तस्य शब्दानुशासनस्य महेश्वरप्रसादाल्लब्धानि अइउण् इत्यादीनि चतुर्दशमाहेश्वरसूत्राण्याधारीकृत्य प्रत्याहारमाध्यमेनैव विहितः । अनेन पाणिनिः स्वप्रतिभायाः वैशिष्ट्य विहितम्[41] । पाणिनेः अष्टाध्याय्याः अस्तित्वं तावत्पर्यन्तं स्थास्यति यावद् विश्वस्मिन् संस्कृतस्याध्ययनाध्यापनप्रवाहः प्रचलिष्यति [42] । पाणिनीयव्याकरणपरम्परायाः प्रमाणभूताः मूलग्रन्थाः भवन्ति।

पाणिनेःअष्टाध्यायी
कात्यायनस्यवार्तिकम्,
पतञ्जलेःमहाभाष्यञ्च।
व्याकरणस्य मुनित्रयम् इत्यभिधीयते। 'यथोत्तरंमुनीनांप्रामाण्यम्' [43] भाष्यकारमतमेवमुख्यं प्रमाणम्।

**कात्यायनः**

पाणिनीयव्याकरणे यावन्ति वार्तिकानि विलिखितानि तेषु कात्यायनस्य वार्तिकपाठ एव सुप्रसिद्धः।' कात्यायन' शब्दस्य व्युत्पत्तिरेवं भवति – कतस्य गोत्रापत्यं पुमान्कात्यः तस्य अपत्यं युवाकात्यायनः। अयञ्च दाक्षिणात्य इति पतञ्जलि वचनात् ज्ञेय महाभाष्येपश्पशाह्निके'प्रियतद्धिताः दक्षिणात्याः[44] यथालोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेषु इति प्रयुज्यते,' इति सः पाणिनेः सूत्राणामाविर्भावात् परं व्याकरणशास्त्रस्य आवश्यकतानुसारेण परिष्कारकरणाय यत्नम् अकरोत्। पाणिनीयसूत्रे अस्पष्टतयाप्रतिपादितानां तत्त्वानां सम्यग् प्रतिपादनार्थम् , दुरुक्तानां तत्त्वानां परिहारार्थम् अनुक्तानाम् उपसंख्यानार्थं च वार्तिकानि विरचितानि कात्यायनेन । पराशरोपपुराणे वार्तिकलक्षणम् एवं प्रतिपादितम्-

उक्तानुक्तदुरुक्तानां चिन्तायत्रप्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुर्वातिकज्ञाःमनीषिणः [45]।।इति।

पतञ्जलिना वार्तिककारविषये चर्चाकृता।' आतोऽनुपसर्गेकः [46]' इति सूत्रस्थस्य सम्प्रसारणप्रसङ्ग इति, वार्तिकस्य विश्लेषणक्रमे समाधानभाष्यत्वेन निर्दिशति। भगवान्पतञ्जलिः 'योऽनिष्टादचः पूर्वस्तत् कार्यस्थानित्वहि। प्रोवाच भगवान् कात्यस्तासिद्धिर्यणस्तुते ।
त्रिकाण्डकोषे- 'मेधाजित्कात्यःकात्यायनश्च सः पुनर्वसुर्वररुचिः'। संस्कृतसाहित्येतिहासे विभिन्नकात्यायनानां चर्चा दरीदृश्यते। अत्र अस्माकम् अभिमतं वार्तिककारकात्यायनः तिष्ठति , तन्नाम व्यक्तित्वसम्बन्धीविवादः अत्रनेष्टः। संक्षेपतः इदं कथयितुं शक्यते यत् वररुचिः भिन्न[47] इति । कात्यायनस्तु वार्तिकं विरच्य पाणिनीयसूत्राणां महतीं समालोचनमकरोदिति केषाञ्चिन्मतम्। वस्तुतः पाणिनिशास्त्रे केवलं दोषान्वेष्टुं वार्तिकानि न लिखितानि , किन्तु निष्पक्षपातेन तत्र गुणदोषविवेचनाय तानि प्रवृत्तानि। कात्यायनस्य पर्यायनामानि - कात्यः , कात्यायनः, पुनर्वसुः, मेधाजित्, वररुचिः च इत्यादीनि संस्कृतव्याकरणशास्त्रेतिहासविमर्शे प्रतिपादितानि[48]।

**कृतयः**

कात्यायनेन पाणिनीयव्याकरणाङ्गभूतानि वार्तिकानि, भ्राजाःश्लोकाः, छन्दः शास्त्रम्, स्मृतिः, स्वर्गारोहणकाव्यम्, सामुद्रिकग्रन्थः च लिखिताः। कात्यायनस्य

33.जि गंगाधरन नायर व्याकरणचरित्रम् पृ. १६
34.वैयाकरण सिद्धान्तकौमुदी, तत्वबोधिनी पृ. ५७२ चौखम्बा सुरभारती वाराणसी वि. सं २०१०
35पाणिनि.अष्टाध्यायी ५. २. ११५ चौखम्बा सुरभारती वाराणसी वि. सं १९९४
36.Kielhorn, Das Gupta And De assumed that Panini the poet had to be placed in the fourth or fifth B. C Panini: A Survay of Research, George Cardona p. 262.
37.जयादित्यवामन् काशिकावृत्तिः चौखम्बा विद्याभवन् वारासी सन् २०१०
38.पदमञ्जरी
39महाभाष्यम् .प्रदीपटीका कैयट चौखम्बा सुरभारती वाराणसी . सन् २००४
40. Accepting that the sutrs version of the paniniyasiksa was composed by Panini –Yudhisthiramimamsaka, George Cardona, Panini: A survey of Research p. 148
41.अशोकचन्द्र गौड शास्त्री, संस्कृतव्याकरणशास्त्रस्येतिहासविमर्शः पृ. ४७
42.स्फोट वि. पृ. २७
43.पतञ्दलि महाभास्यम् चौखम्बा सुरभारती वाराणसी . सन् २००४
44. पतञ्दलि महाभाष्यम पस्पसाह्निकम् चौखम्बा सुरभारती वाराणसी . सन् २००४
45.युधिष्ठिरमीमांसकः संस्कृव्याकरणशास्त्र का इतिहास प्रथमो भाग पृ. ३२८ बहालगढ सोनीपत हरियाणा सन् १९८४
46 परञ्दलि.महाभाष्यम् ३.२. ३ चौखम्बा सुरभारती वाराणसी . सन् २००४
47.कात्यायमवार्त्रिकानां भाषाशास्त्रीयमध्ययनम् डा. सतीशचन्द्र झा पृ. १५
48.संस्कृत व्याकरण शास्त्रका इतिहास पृ १४२ बहालगढ सोनीपत हरियाणा सन् १९८४

कालनिर्णयाय प्रमाणं नास्ति[49]। वार्तिके प्रतिपादितानां शब्दानां समीक्षायां पण्डिताः निर्णयं प्राप्तवन्तः कात्यायनपतञ्जलयोः मध्ये वर्षशतकद्वयस्य अन्तरः दृश्यते।

**कालः**

पतञ्जलेः कालः क्रिस्तोः पूर्वद्वितीयशतक इति सामान्यतया अङ्गीक्रियते। अतः कात्यायनस्य जीवनसमयः क्रिस्तोः पूर्वंचतुर्थवर्षशतकम् इत्यनुमीयते [50] ।महाभाष्यकारकात्यायनस्य वार्तिकानि अनूद्य तेषां व्याख्यानं तदनुसारेण पाणिनीय सूत्राणां व्याख्यानञ्च करोति क्वचिद्वार्तिकमतं खण्डयति।

**पतञ्जलिः**

मुनित्रये उत्तरोत्तरस्य अधिकं प्रामाण्यमस्ति इति वैयाकरणैः स्वीक्रियते। अत एवोच्यते *'यथोत्तरंमुनीनांप्रमाणम्'* । पाणिन्यपेक्षयाकात्यायनः कात्यायनापेक्षया अधिकलक्ष्यदर्शीपतञ्जलिः इत्येतत् उत्तरोत्तरस्य प्रामाण्यस्य कारणम्। सूत्रवार्तिकेषु पतञ्जलिकृतं महाभाष्यम् अतिप्रौढंव्याख्यानं भवति। भगवान्पतञ्जलिः महाभाष्यं विरच्य सूत्रवार्तिकयोः समीक्षयासह तदुदाहरणान्यपिकृतवान्। महाभाष्यं नकेवलं व्याकरणनिबन्धमात्रमित्यवगन्तव्यम्। अस्मिन्ग्रन्थे सर्वाण्यपिज्ञातव्यानि विषयजातानि, स्थानेसपरिकरं विवेचितानि वर्तन्ते। तथोक्तं शाब्दिकशिरोमणिना भर्तृहरिणा-

कृतेऽथपतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने[51] ।।इति।

महाभाष्यस्य सन्दर्भे नन्दस्य वचनमधिकृत्य युधिष्ठिरमीमांसकमहोदयोब्रूते अष्टाध्यायीमहाभाष्ये द्वे व्याकरणपुस्तके - ततोऽन्यत्पुस्तकं यत्तुतत्सर्वं धूर्तचेष्टितम्[52]।।भाष्यलक्षणविषये एवम् उच्यते। यथा-

सूत्रार्थोवर्ण्यतेयत्र वाक्यैःसूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदोविदुः।।इति

**कृतयः-**

पतञ्जलिना प्रणिताः ग्रन्थाः, यथा सन्ति-
चरकसंहिता ,
योगसूत्रम् ,
महाभाष्यम्
सूत्राणां वार्तिकाणाञ्च पर्यालोचनं पतञ्जलिना कृतम् अत्यन्तं विपुलं व्याख्यानं वर्तते महाभाष्यम्। अस्मिन् ग्रन्थे पूर्वपक्षसिद्धान्तनिरूपेण सुन्दरं प्रतिपादनं विद्यते। व्याकरणे विद्यमानानां दुर्ग्राह्यानां शास्त्रतत्त्वानां विवरणविषये महाभाष्यकारस्य विवरणरीतिः अत्यन्ता सरला प्रतिभाति। अतः व्याकरणे भाष्यमेव परमं प्रधानम्। विविधप्राचीन ग्रन्थेषु पतञ्जलेः नामान्तराणि द्रष्टुं शक्यन्ते। तानि गोनदीया, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत् , शेषराजः, शेषाहिः, चूर्णिकारः, पदकारः इति। गोणिकापुत्र इति पदेन पतञ्जले : मातुर्नाम गोणिका इति युधिष्ठिरमीमांसकः अभिप्रैति। तस्य देशविषये केचनपण्डिताः गोनदीयदेशः तस्य स्वदेश इति, सकाश्मीरदेशे वर्तते । युधिष्ठिरमीमांसकेन अनुचिन्त्यतेयत् अस्यदेशः मध्यभारतम् इति।

**कालः**

महाभाष्ये विद्यमानानां विषयाणाम् अनुसारेण तस्य कालः क्रिस्तोः पूर्वं द्वितीयशतके इति ऐतिहासिकानाम् अभिप्रायः [53] । योगशास्त्रे प्रमाणभूतोग्रन्थः योगसूत्रं पतञ्जलिकृतं भवति। महाभाष्यं नकेवलं व्याकरणप्रतिपादनम् अपितु अन्येषां शास्त्राणां समग्रप्रतिपादनं वर्तते। अनन्यिन भाष्याणि अपेक्ष्य सर्वविषयप्रतिपादनत्वात् अयं ग्रन्थः महाभाष्यम् इत्युच्यते।

**अन्यवैयाकरणाः**

महर्षिपतञ्जलेः पश्चात्कालिकवैयाकरणेषु पाणिनीयसम्प्रदायस्य प्रभावः द्रष्टुं शक्यते। पाणिनीयव्याकरणसम्प्रदाये अष्टाध्यायीक्रमे सम्पूर्णपाणिनीयसूत्राणां व्याख्यानग्रन्थो भवति काशिकावृत्तिः।

**जयादित्यवामनः**

काशिकावृत्ति इति ग्रन्थस्य रचयितारौ काश्मीरदेशनिवासिनौ जयादित्यवामनौ समुन्नतंस्थानमलङ्कुरुतः। जयादित्यस्य जीवनकालः क्रिस्तोः पश्चात्पञ्चाशदुत्तरपञ्चशते वर्षे भवति[54]। काशिकावृत्तेः बहूनि व्याख्यानानि अभवन्। तेषु प्रधानो भवति जैनेन्द्रबुद्धिना (750A.D.) [55] कृतः न्यासोऽथवाकाशिकाविवरणम्, हरदत्तकृतः पदमञ्जरीच। हरदत्तः क्रिस्तोः पश्चादेकशतोत्तरैकसहस्रतमे आसीत्। ( 1100 A.D[56] )
पाणिनीयव्याकरणसम्प्रदाये व्याकरणशास्त्रं दर्शन पथे प्रतिष्ठतः आचार्यो भवति भर्तृहरिः, तस्य जीवनकालः क्रिस्तोः पश्चात्सप्तमेशतके आसीत्[57]। तेन कृते वाक्यपदीयनामके ग्रन्थे शब्दस्य नित्यत्वं स्थापयति। तद्वत्स्फोटवादस्य विवरणञ्च करोति। व्याकरणाध्यनं मोक्षमार्गस्य प्रथमसोपानं वर्तते।

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणा।
इयं सामोक्षमाणानामजिह्म राजपद्धतिः।। [58]

तत्रशब्दः चतुर्विधः परा,पश्यन्ती, मध्यमा, वैखरीच , तेन अस्मिन्ग्रन्थे स्थापितम्। पाणिनीयव्याकरणस्य अन्यः प्रमुखः आचार्यः भवति महाभाष्यप्रदीपटीकायाः कर्ताकैयटः। कैयटः त्रयोदशशतके जीवितवान्। पदमञ्जरीनाममहाभाष्यव्याख्यानमपि कैयटविरचितं वर्तते। धर्मकीर्तिप्रणीतं रूपावतारं व्याकरणसम्प्रदाये नूतनशैलीम् उत्पादयति, एतादृशीशैली आश्रीयते। विमलसरस्वतिना कृतारूपमाला। (13th Century A.D.) अस्मिन्काले विरचितव्याकरणग्रन्थः भवति। रामचन्द्रकृताप्रक्रियाकौमुदी। प्रक्रियाकौमुद्याः व्याख्याने भगवता विटलाचार्येणकृतः प्रसादः, शेषकृत्स्नकृतःप्रक्रियाप्रकाशश्च। भट्टोजिदीक्षितस्य [59] सिद्धान्तकौमुदी व्याकरणशास्त्राध्ययनस्य अधिष्ठानशिला भवति। प्रक्रियाकौमुदी, रूपमाला इति व्याकरणग्रन्थ द्वयस्य मार्गमवलम्य विरचितो ग्रन्थो भवति सिद्धान्त कौमुदी। पाणिनीयसूत्राणि, वार्तिकानि च प्रक्रियाशैल्या यथास्थाने निवेशीतानि इति। सिद्धान्तकौमुदीपाणिनीयव्याकरणे प्रवेशाय उत्तमः ग्रन्थः इति पण्डितानां मतम्। भट्टोजिदीक्षितेन विरचितं सिद्धान्तकौमुदीव्याख्यानं भवति प्रौढमनोरमा। जैनेन्द्रसरस्वतीकृतातत्त्वबोधिनी, वासुदेवदीक्षितकृताबालमनोरमाचेतिग्रन्थद्वयं सिद्धान्तकौमुद्याः अन्येव्याख्याने भवतः। भट्टोजिदीक्षितस्य कालः षोडशशतके इति सर्वैरङ्गीकृतम्। सप्तदशशतके विभूषितेन नागेशभट्टेन प्रणीताः प्रदीपोद्योतोनाममहाभाष्यव्याख्यानम्, परिभाषेन्दुशेखरः, शब्दरत्नं नाम प्रौढमनोरमाव्याख्यानम्, विषमानं शब्दकौस्तुभस्यव्याख्यानम्, मञ्जूषात्रयं च व्याकरणशास्त्रस्य प्रसिद्धाः ग्रन्थाः सन्ति। संस्कृतव्याकरणे अष्टादशशतकानन्तरं बहवः पाणिनीयव्याकरणग्रन्थाः विरचिताः।

49.Katyayana is to be pleaced the middle of the third century B. C B.C JayapalaVidyalankaka and K.P. Jayaswal- George cardona,Panini- p 267
50.जि. गगाधरन नायर व्याकरणचरितम् पृ. ४२
51.भर्तृहरि वाक्यपदीयम् वाक्यकाण्ड श्लो. ४७७ सं. सं. वि. वि वाराणसी . सन् २०१६
52युधिष्ठिरमीमांसकः संस्कृव्याकरणशास्त्र का इतिहास बहालगढ सोनीपत हरियाणा सन् १९८४
53.Encyclopaedia of language and linguistics, S. Shukla. Vol. IX, The Boulevard, OXFORD. UK, 2006. P. 241
54.Post paninian Systems of Sanskrit Grammar, S.K BelwalkarItsing tells us that Jayaditya died about 660 AD,p. 23
55.Systems of Sanskrit grammar S.K Belvalkar, p. 32
56.Systems of Sanskrit grammar S.K Belvalkar, Bombay 1915 p 34
57.Systems of Sanskrit grammar S.K Belvalkar, Bombay 1915 p 34
58.भर्तृहरि वाक्यपदीयम् ब्रह्मकाडम् श्लोक १८ चौख़्बा विद्याभवन् सन २००१
59.स्फोट. विमर्शः पृष्ठ ५२

**पाणिन्यनन्तरकालिका पाणिनीयव्याकरणपरम्परा**

बहवः पाणिन्यनन्तर वैयाकरणाः तेषां व्याख्यानेषु त्रिमुनिविरचितेषु ग्रन्थेषु प्रभावो द्रष्टुं शक्यते। एतत्तु भाषायाः घटनां संरक्षयति।

**कातन्त्रव्याकरणम्**

कातन्त्रः राज्ञः शतवाहनस्य आश्रितः अमात्यः च आसीत अस्य सम्प्रदायस्य रचयिता शर्ववर्मा। अतः शर्ववर्मणः कालःक्रिस्तो: पश्चात्पञ्चमशतकस्य समीपे इति वक्तुं शक्यते।[60] अस्मिन्व्याकरणे १६८६ सूत्राणिभवन्ति[61]।

**चान्द्रव्याकरणम्**

पाणिन्यन्तरकालव्याकरणेषु मुख्यं भवति। चन्द्रगोमिना प्रणितं चान्द्रव्याकरणम्। चन्द्रगोमिनः जीवनकालगणना विषये तस्य पश्चात्कालिका वैयाकरणानां प्रतिपादनमेव प्रमाणम्। यथा-जयादित्यवामनौ काशिकायां चान्द्रव्याकरणे विद्यमानानां पञ्चत्रिंशत्[62] सूत्राणां प्रतिपादनं कुरूतः । तानि सूत्राणि अष्टाध्याय्यां न विद्यन्ते। वाक्यपदीयकारेण भर्तृहरिणा चन्द्राचार्यस्य नामस्मृतम्। अतः चन्द्राचार्यस्यकालः क्रिस्तोः पश्चात्सप्तत्युत्तरचतुश्शततमे वर्षे इति डा. बल्वाल्करमहोदयेन प्रोक्तम्[63]। चान्द्रव्याकरणे त्रयोदश प्रत्याहारसूत्राणि वर्तन्ते। तानि पाणिनीय व्याकरणे विद्यमानानि चतुर्दशमाहेश्वरसूत्राण्येव किन्तु हयवरट् लण् इति माहेश्वरसूत्रद्वयंमिलित्वाहयवरट् लण् इति एकप्रत्याहाररूपेण विचारः क्रियते[64]। पाणिनिकात्यायनपतञ्जलिशर्ववर्मा आद्याचार्याणां व्याकरणपरम्परयाः प्रचोदितेन चन्द्रगोमिना अस्य व्याकरणस्य निर्माणं कृतम् ।तत्तु अनन्तरकालिकानां व्याकरणपद्धतीनां निर्माणाय सम्पन्नम् उपादानंभवति।

**जैनेन्द्रव्याकरणम्**

पञ्चमे शतके विद्यमानं व्याकरणं भवति – *'देवनन्दीति क्रिस्तो: पश्चात्जैनाचार्यश्च जैनेन्द्रव्याकरणम्''*[65]। जैनमतपण्डिताः प्राचीनसंस्कृतग्रन्थान् पाठनाय अस्याः व्याकरणपद्धतेः निर्माणम् अकुर्वन्। अस्य व्याकरणस्य मुख्य प्रणेता भवति - देवनन्दी। सः जिनेन्द्रः इति अपरनाम्नाविख्यातः। अतः एतद् व्याकरणं जैनेन्द्रव्याकरणमित्यभिधीयते। तद्व्याकरणं वैदिकब्राह्मणसम्प्रदायात् व्यतिरिक्तं वर्तते। एतत्क्रिस्तो: पश्चात्त्रयोदशशताब्दीपर्यन्तं दक्षिणभारते जैनानां मध्ये प्रचलितम्।

**सरस्वतीकण्ठाभरणम्**

क्रिस्तो: पश्चात् एकादशशतके धारानगरस्य अधिपतिना भोजराजेन विरचित: नूतनसम्प्रदायग्रन्थ: भवति सरस्वतीकण्ठाभरणम्। भोजश्चासौसर्वशास्त्रपारङ्गतः चासीत्। सः पाणिनीयव्याकरणपद्धते: अनुकरणं कृत्वा सूत्राणि विरच्य स्वशैल्यापद्यरूपेण व्यरचयत् व्याकरणं तदस्ति सरस्वतीकण्ठाभरणम्।

**मुक्तबोधव्याकरणम्**

मुक्तबोधव्याकरणम् वोपदेवविरचितं वर्तते। विरचितस्यास्य रचनाकालः क्रिस्तो: पश्चात्त्रयोदशशतके अभवत्। एतत्पाणिन्यनन्तरकाले विद्यमानेषु व्याकरणेषु प्रधानभूतं विद्यते। एतद्व्याकरणम् अतीवसरलम् अभवत्। अतः तत्जनसामान्यस्य प्रशंसायाः पात्रीभूतम् अभवत्। पञ्चाशदधिकानि व्याख्यानानि अस्मिन्व्याकरणे विद्यन्ते। बङ्गलादेशे अस्य व्याकरणस्य प्रचारोऽधिको बभूव।

**सारस्वतव्याकरणम्**

अनुभूतिस्वरूपाचार्यनाम् सन्यासिनाविरचितं व्याकरणं वर्तते - सारस्वतव्याकरणम्। एतद् व्याकरणं सरस्वतीदेव्या इति स्वीक्रियते । अत: एतत्सारस्वत् व्याकरणम् इत्यभिधीयते। अस्य व्याकरणस्य रचनाकाल: क्रिस्तो: पश्चात्पञ्चदशशतके अभवदिति पण्डितानाम् अभिप्रायः[66]। अस्य व्याकरणस्य भाषापद्धतीलालित्य वर्तते।

**हरिनामामृतव्याकरणम्**

चैतन्य भक्तिप्रस्थानस्य अनुयायिना रूपगोस्वामिना प्रणीतं व्याकरणं वर्तते हरिनामामृतम्। हरिः अस्य व्याकरणस्य मूलतत्त्वस्य प्रदायकः इति विश्वासः।
अतः भक्त्या एतद् व्याकरणं हरिनामामृतम् इति अभिधीयते। अद्य उपलभ्यमान हरिनामामृतव्याकरणस्य प्रणेतारूपगोस्वामि तस्य कालः जीवगोस्वामी इति पण्डितानां मतम्[67]। अस्य व्याकरणस्यरचनाकालः क्रिस्तो : पश्चात्षोडशशतके इति मनीषिणः ब्रुवन्ति[68]। हरिनानामृतव्याकरणसमानः व्याकरणग्रन्थः भवति- हरिलीलामृतव्याकरणम्। अस्य व्याकरणस्य कर्ता आचार्यजीवगोस्वामी। निर्भाग्यवशात् उपर्युक्तव्याकरणद्वयम् अधुना नोपलभ्यते[69]। पाणिनीयव्याकरणे दृश्यमानासंज्ञापद्धतिः उपर्युक्तव्याकरणसम्प्रदायेऽपि द्रष्टुं शक्या। एतस्मिन् विषये पाणिनि – तत्पूर्वीया आचार्याः विशेषेण श्रद्धेयाः।

**उपसंहारः**

पाणिनीयव्याकरणपरम्परायां पाणिनिपूर्वकालिकानां वैयाकरणानां तथा पाणिन्युत्तरकालिकानां वैयाकरणानां व्याकरणशास्त्रे ऐतिहासिकमवदानविषये समीक्षणं विहितम्। प्राचीनवैयाकरणपरम्परायाम् इन्द्र-वायु-भरद्वाज-भागुरि-पौष्करसाद्याचार्या आसन्। एते आचार्याः पाणिनेः पूर्वकालिकाः, किन्तु तेषां नामानि अष्टाध्याय्यां नास्ति, परन्तु अत्र आपिशलेर्नाम अस्ति- 'वा सुप्यापिशलेः' इति। पाणिनेः जन्मकालविषयेऽपि प्रामाणिकं तथ्याङ्कं वर्तते, अस्मिन् शोधपत्रे। पाणिन्युत्तरकालिकानां मुनीनां कालविभाग एवं तेषां प्रणितानां ग्रन्थानामुल्लेखोवर्तते।

**सन्दर्भ**

1. पाणिनि अष्टाध्यायी चौखम्बा संस्कृत विद्याभवन् वाराणसी सन १९९७
2. भट्टोजिदीक्षित वैयाकरणसिद्धान्तकौमुदी चौखम्बा संस्कृत विद्याभवन् वाराणसी सन२०१०
3. पतञ्जलि महाभाष्यम् चौखम्बा संस्कृत विद्याभवन् वाराणसी सन् २००४

[60].Post Panini of Sanskrit grammar, p. 17
[61]. Post Panini of Sanskrit grammar, p. 17
[62].Post Panini of Sanskrit grammar, p. 45
[63].S.K Belvalkar, Bombay Systems of Sanskrit grammar,1915 p 58
[64].Post Panini of Sanskrit grammar, p.51
[65].Post Panini of Sanskrit grammar, p.82
[66]. Post Panini of Sanskrit grammar, p. 117
[67]. Post Panini of Sanskrit grammar, p.181
[68]. Post Panini of Sanskrit grammar, p.238
[69]. Post Panini of Sanskrit grammar, p.81